# Pramodakritam Shiva Stotram

# પ્રમોદકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Pramodakritam Shiva Stotram

File name : pramodakRRitaMshivastotram.itx

Category : shiva, tAmraparNImAhAtmya, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 29/114-122||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# પ્રમોદકૃતં શિવસ્તોત્રમ્

પ્રમોદ ઉવાચ ।
પ્રાયઃ પ્રપન્નાર્તિહરોઽસિ નાથ પ્રપન્નસર્વેન્દ્રિયવૃત્તિભાજામ્ ।
અમુક્તસાન્નિધ્યકરો બુધાનાં અતસ્ત્વદન્યં શરણં ન પશ્યે ॥ ૧૧૪॥

પ્રવાતશીલઃ પ્રહતેષુ નિત્યં પ્રસિદ્ધમેતદ્વચનં ત્રયીષુ ।
અનર્ચતો મે કૃપણસ્ય શમ્ભો કૃપાકરોઽયં તદહો વિચિત્રમ્ ॥ ૧૧૫॥

ઉપેયુષામેવ તનોતિ કામં સુરદ્રુમશ્રોત્ર કથં ન દૃષ્ટમ્ ।
પાદારવિન્દોઽનુસ્મરણોઽનુતાપી દૂરે મમાનુગ્રહકૃદ્વિચિત્રમ્ ॥ ૧૧૬॥

પવિત્રિતં જન્મ જગત્રયો યત્ત્વયા કૃપાલોચનપાતિતસ્ય ।
મમાધુના મઙ્ગલપુણ્યપૂર્ણા સ્વયં સમાનન્દસુસમ્પદો યત્ ॥ ૧૧૭॥

નમઃ શિવાય ચ શુભહેતુહેતવે સુધાંશુચૂડામણયે નમો નમઃ ।
નગાત્મજાઽઽલિઙ્ગિતચારુમૂર્તયે સહસ્રકૃત્વઃ પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૧૧૮॥

ગિરીશ વિશ્વેશાધુના પુનીહિ પુણ્યેન કૃપાક્ષિવર્ચસા ચ ।
પુરત્રયધ્વંસનપુઞ્જિતશ્રીઃ કિમદ્ભુતં ભૂરુહમાત્રતક્ષણમ્ ॥ ૧૧૯॥

વૃષાઙ્ક વિશ્વાધિક ભર્ગ તે પાદામ્બુજારાધાનભાગ્યદાયિના ।
વિલોકનેનાશુ વિલોકયાધુના પ્રપન્નમેનં જનમાર્તિભઞ્જન ॥ ૧૨૦॥

શમ્ભો તવાલં જનિતાનિલભાગધેયમન્તે વિચિન્તયતિ વિશ્વમિદં સમસ્તમ્ ।
ત્વય્યદ્ભુતામધુના તરુમાત્રદાહલીલાવિલાસકોપભરાદ્દયાલો ॥ ૧૨૧॥

પ્રસીદ મયિ સન્તતં પ્રમથનાથગાથેતર
પ્રવાહ કરુણામ્બુધે પ્રણતિભાતિ પાપાહન્ ।
અકાલવિલયાગમવ્યસનશઙ્કશઙ્કાવતા-
મપાકુરુ ભયામયં સ્વપદસેવિનાં મા ચિરમ્ ॥ ૧૨૨॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે એકોનત્રિંશાધ્યાયાન્તર્ગતં

પ્રમોદકૃતં શિવસ્તોત્રં

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૨૯/૧૧૪-૧૨૨ ॥

tAmraparNImAhAtmya . adhyAya 29/114-122..

Proofread by PSA Easwaran

*Pramodakritam Shiva Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*